प्रहृष्यैव पुनःपुनः। पुनरायाचितं तत्र पितरं मातरं पुनः। सक्रोधो वर्त्तते नित्यं वैरकर्मणि सर्वदा। पितरं मारयित्वा तु मातरञ्च पुनःपुनः। प्रयात्येवं स दुष्टात्मा पूर्ववैरानुभावतः ३। अथातः संप्रवक्ष्यामि यस्मात्सौख्यं भवेत् प्रियम्। जातमात्रः प्रियं कुर्य्याद्बाल्ये गमनक्रीड़नैः। वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम्। भक्त्या सन्तोषयेत् नित्यं तावुभौ परिपालयेत्। स्नेहेन वचसा चैव प्रियसम्भाषणेन च। मृतौ गुरू समाज्ञाय स्नेहेन-रुदते पुनः। श्राद्धकर्माणि सर्वाणि पिण्डदानादिकां क्रियाम्। करोत्येवं सुदुःखार्त्तस्तेभ्यो यात्रां प्रयच्छति। ऋणत्रयान्वितः स्नेहाद्भियोपयति निश्चितः। यस्मात्सौख्यं भवेत् कान्तं प्रयच्छति न संशयः। पुत्रो भूत्वा महाप्राज्ञ अनेन विधिना किल ४। उदासीनं प्रवक्ष्यामि तवाग्रे द्विज! साम्प्रतम्। उदासीनेन भावेन स दैव परिवर्त्तते। ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति। नैवोपयाति संत्यज्य उदासीनो द्विजोत्तम!। तवाग्रे कथितं सर्वं पुत्राणां गतिरीदृशी। यथा पुत्रास्तथा भार्य्या पिता माताथ बान्धवाः। भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा। गजामहिष्यो दासश्च ऋणसम्बन्धिनस्त्वमी” पाद्मे भूमिख०११।१२।

तत्रैव १८।२०अ० सुपुत्रलक्षणं यथा

“पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम्। पुण्यप्रसक्तो यस्यात्मा सत्यधर्मरतः सदा। बुद्धिमान् ज्ञानसम्पन्नस्तपस्वी वाग्विदांवरः। सर्वकर्मसु सन् धीरो वेदाध्ययनतत्परः। सर्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः। याजकः सर्वयज्ञानां दाता त्यागी प्रियंवदः। विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत् प्रियः। पितृमातृपरो नित्यं सर्वस्वजनवत्सलः। कुलस्य तारको विद्वान् कुलस्य परिपोषकः। एवं गुणैः सुसंयुक्तः सुपुत्रः सुखदायकः”।

वैष्णवपुत्रस्य पूर्वपुरुषत्रातृत्वं यथा “वैष्णवो यदि पुत्रः स्यात् त्रायते हि स पूर्वजान्। पितृनधस्तनान् वंशांस्तारयन्ति च पावनाः” कुपुत्रजनने पितॄणां नरकगमनं यथा “तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्वजाः। सुघोरे नरके दीनाः शपन्ति च मुहुर्मुहुः। यथा जले कुप्लवेन तरन्मज्जति मूढधीः। तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति। जातमात्रे कुले जन्तौ संशेरते पितामहाः। किमेषोऽधो नयेदस्मानूर्द्ध्वं वा वैष्णवो भवतु”। २लग्नावधिके पञ्चमस्थाने नीलक०ता० वर्षका-

लीने ४मदृमभेदे च। पुत्रमदृमशब्दे दृश्यम्।

**पुत्रक** पु० पुत्र+अनुकम्पायां संज्ञायां वा कन् स्वार्थे क वा। १अनुकम्पितपुत्रे २पुत्रमात्रे च अष्टापदे ३शरभे पशुभेदे पुंस्त्री०। ४धूर्त्ते ५शैलभेदे ६वृक्षभेदे च मेदि० ७पतङ्गे ८अनुकम्प्यजने च शब्दरत्ना०।

**पुत्रकन्दा** स्त्री पुत्र इव स्निग्धत्वात् कन्दोऽस्याः। लक्ष्मणाकन्दायां राजनि०।

**पुत्रका** स्त्री पुत्र इव कायति कै–क। औरसतुल्यायां पुत्रिकायां शब्दरत्ना०। [भिक्षाप्रयुक्ते।

**पुत्रकाम** त्रि० पुत्रं कामयते कामि–अण् उप०स०। पुत्रा-

**पुत्रकाम्या** स्त्री आत्मनः पुत्रमिच्छति पुत्र+काम्यच्–भावे अ। आत्मनः पुत्रेच्छायाम् भट्टिः १।४२ [६।१।१

**पुत्रक्रथ** पु० क्र+बा० भावे थक् ६त०। पुत्रस्योत्पादने ऋ०५।

**पुत्रघ्नी** स्त्री पुत्रं हन्ति हन–टक्। सुश्रुतोक्ते योनिरोगभेदे “स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्”।

**पुत्र(त्त्र)जग्धी** स्त्री पुत्रो जग्धोयया ङीष्। “वा हतजग्धयोः” वार्त्ति०तकारस्य वा द्वित्वम्। पुत्रभक्षणकर्त्र्यां स्त्रियां तथा पुत्र(त्त्र)हतीशब्देऽपि वा तस्य द्वित्वं ङीप् च। सा च पुत्रहन्त्र्यां स्त्रियां स्त्री।

**पुत्रजीव** पु० पुत्रं गर्भं जीवयति जीव–अण् उप० स०। (जियापुता) वृक्षे “पुत्रजीवो हिमो वृष्यः स्लेश्मदो गर्भजीवनः। चक्षुष्यः पित्तशमनः दाहतृष्णानिवारकः” राजनि० “पुत्रजीवो गुरुर्वातकारी वृष्णो मतो बुधैः। स्तृष्टमूत्रमलः स्वादुः पटुः कटुरपि स्मृतः” भावप्र०। [पुत्रजीववृक्षे रत्नमा०।

**पुत्रञ्जीवक** पु० पुत्रं गर्भं जीवयति जीव+बा० ख्युल्।

**पुत्रदा** स्त्री पुत्रं गर्भं ददाति सेवनात् दा–क। १वन्ध्याकर्कट्यां २लक्ष्मणाकन्दे च राजनि० गर्भधारके त्रि०।

**पुत्रदात्री** स्त्री पुत्रं ददाति दा–तृच् ङीप्। मालवे प्रसिद्धलताभेदे “पुत्रदात्री वातकफकटुष्णानाशिनी मता। सुरभिः सर्वदा पथ्या वन्ध्यादोषविनाशिनी” राजनि०।

**पुत्रपौत्र** न० गवाश्वादि० समा० द्व०। पुत्रपौत्रयोः समाहारे तदनुभवति ख। पुत्रपौत्रीणः पुत्रपौत्रपर्य्यन्तगामिनि भट्टिः ५।१५। [राजनि० २पुत्रदातृमात्रे त्रि०।

**पुत्रप्रदा** स्त्री पुत्रं प्रददाति प्र+दा–क। १अविकायां क्षुपभेदे

**पुत्रप्रिय** पु० ६त०। खगभेदे भा०व० १०८अ०।

**पुत्रभद्रा** स्त्री पुत्रस्य भद्रं यस्याः ५ब०। वृहज्जीवन्त्याम् लतायां राजनि०।